## उपगङ्गम्

गङ्गायाः समीपे इत्यर्थे समीपार्थद्योतकस्य उपेत्यव्ययस्य गङ्गा इति सुबन्तेन सह 'अव्ययं विभक्तिसमीप....' इति सूत्रेण अव्ययीभावसमासः। 'कृत्तद्धितसमासाश्च' इत्यनेन सूत्रेण प्रातिपदिकसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुब्-लुकि प्रथमानिर्दिष्टत्वात् 'प्रथमानिर्दिष्टं समास उपसर्जनम्' सूत्रेण उप-इत्यस्य उपसर्जनसंज्ञा एवञ्च 'उपसर्जनं पूर्वम्' सूत्रेण तस्य पूर्वनिपातः । तथा हि 'उपगङ्गा' इति स्थिते ' ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन प्रातिपदिकस्य अन्त्याकारस्य ह्रस्वत्वे 'उपगङ्ग' इति प्राप्ते सति पुनः सुव्युत्पत्तौ 'अव्ययीभावश्च' इत्यनेन अव्ययत्वात् 'अव्ययादाप्सुपः' अनेन सुप्-लोपे प्राप्ते सति 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः 'अनेन अमादेशे 'अमि पूर्वः' अनेन पूर्वरूपैकादेशे 'उपगङ्गम्' रूपमिति सिद्धम्।

-- By Sanjoy Barman